शब्दरूपावलिः

श्री. सन्दीप वसन्त जोशी

रामो हरिः करी भूभृद्भानुः कर्ता च चन्द्रमाः।
तस्थिवान्भगवानात्मा दशैते पुंसि नायकः ॥
रमा रुचिर्नदी धेनुर्वाग्धीः सरिदनन्तरम् ।
क्षुध्प्रावृच्च शरच्चैव दशैताः स्त्रीषु नायिकाः॥
ज्ञानं दधि पयो वर्म धनुर्वारि जगत्तथा ।
मधु [illegible] के ॥
सः सा तद्यश्च या यच्च कः का किं त्वमहं त्वयम् ।
इयं चेदं चैष चैषा चैतच्चासावसावदः ॥
पिता माता स्वसा गौर्नौः स्त्रग्भू राजा पतिः सखा ।
हाहा गोपा पपीर्हूहूश्चमूस्त्री कति दिक् प्रधीः ॥
सुलूर्यवक्रीश्चानड्वान्पन्था ज्यायान्महान्स्वभूः ।
सर्वः सर्वा च सर्वं च द्वित्र्यादिश्च गणस्तथा ॥

॥श्रीः॥

अथ शब्दरूपावलिः

॥ पुंलिङ्गशब्दाः ॥

रामो हरिः करी भूभृद्भानुः कर्ता च चन्द्रमाः ।

तस्थिवान्भगवानात्मा दशैते पुंसि नायकाः ॥

१ अकारान्तः पुंलिङ्गो राम-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
रामः	रामौ	रामाः	**प्रथमा**
रामम्	रामौ	रामान्	**द्वितीया**
रामेण	रामाभ्याम्	रामैः	**तृतीया**
रामाय	रामाभ्याम्	रामेभ्यः	**चतुर्थी**
रामात्	रामाभ्याम्	रामेभ्यः	**पञ्चमी**
रामस्य	रामयोः	रामाणाम्	**षष्ठी**
रामे	रामयोः	रामेषु	**सप्तमी**
हे राम	हे रामौ	हे रामाः	**सम्बोधनम्**

२ इकारान्तः पुंलिङ्गो हरि-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
हरिः	हरी	हरयः	**प्रथमा**
हरिम्	हरी	हरीन्	**द्वितीया**
हरिणा	हरिभ्याम्	हरिभिः	**तृतीया**
हरये	हरिभ्याम्	हरिभ्यः	**चतुर्थी**

हरेः	हरिभ्याम्	हरिभ्यः	**पञ्चमी**
हरेः	हर्योः	हरीणाम्	**षष्ठी**
हरौ	हर्योः	हरिषु	**सप्तमी**
हे हरे	हे हरी	हे हरयः	**सम्बोधनम्**

३ इन्नन्तः पुंलिङ्गो करिन्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
करी	करिणौ	करिणः	**प्रथमा**
करिणम्	करिणौ	करिणः	**द्वितीया**
करिणा	करिभ्याम्	करिभिः	**तृतीया**
करिणे	करिभ्याम्	करिभ्यः	**चतुर्थी**
करिणः	करिभ्याम्	करिभ्यः	**पञ्चमी**
करिणः	करिणोः	करिणाम्	**षष्ठी**
करिणि	करिणोः	करिषु	**सप्तमी**
हे करिन्	हे करिणौ	हे करिणः	**सम्बोधनम्**

४ तकारान्तः पुंलिङ्गो भूभृत्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
भूभृत्	भूभृतौ	भूभृतः	**प्रथमा**
भूभृतम्	भूभृतौ	भूभृतः	**द्वितीया**
भूभृता	भूभृद्भ्याम्	भूभृद्भिः	**तृतीया**
भूभृते	भूभृद्भ्याम्	भूभृद्भ्यः	**चतुर्थी**
भूभृतः	भूभृद्भ्याम्	भूभृद्भ्यः	**पञ्चमी**
भूभृतः	भूभृतोः	भूभृताम्	**षष्ठी**
भूभृति	भूभृतोः	भूभृत्सु	**सप्तमी**
हे भूभृत्	हे भूभृतौ	हे भूभृतः	**सम्बोधनम्**

५ उकारान्त पुंलिङ्गो भानु-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
भानुः	भानू	भानवः	**प्रथमा**
भानुम्	भानू	भानून्	**द्वितीया**
भानुना	भानुभ्याम्	भानुभिः	**तृतीया**
भानवे	भानुभ्याम्	भानुभ्यः	**चतुर्थी**
भानोः	भानुभ्याम्	भानुभ्यः	**पञ्चमी**
भानोः	भान्वोः	भानूनाम्	**षष्ठी**
भानौ	भान्वोः	भानुषु	**सप्तमी**
हे भानो	हे भानू	हे भानवः	**सम्बोधनम्**

६ ऋकारान्तः पुंलिङ्गो कर्तृ-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
कर्ता	कर्तारौ	कर्तारः	**प्रथमा**
कर्तारम्	कर्तारौ	कर्तॄन्	**द्वितीया**
कर्त्रा	कर्तृभ्याम्	कर्तृभिः	**तृतीया**
कर्त्रे	कर्तृभ्याम्	कर्तृभ्यः	**चतुर्थी**
कर्तुः	कर्तृभ्याम्	कर्तृभ्यः	**पञ्चमी**
कर्तुः	कर्त्रोः	कर्तॄणाम्	**षष्ठी**
कर्तरि	कर्त्रोः	कर्तृषु	**सप्तमी**
हे कर्तः	हे कर्तारौ	हे कर्तारः	**सम्बोधनम्**

७ सकारान्तः पुंलिङ्गो चन्द्रमस्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः	**प्रथमा**
चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः	**द्वितीया**
चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः	**तृतीया**
चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः	**चतुर्थी**

चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः	**पञ्चमी**
चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्	**षष्ठी**
चन्द्रमसि	चन्द्रमसोः	चन्द्रमस्सु	**सप्तमी**
हे चन्द्रमः	हे चन्द्रमसौ	हे चन्द्रमसः	**सम्बोधनम्**

८ वस्वन्तः पुंलिङ्गो तस्थिवस्-शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
तस्थिवान्	तस्थिवांसौ	तस्थिवांसः	**प्रथमा**
तस्थिवांसम्	तस्थिवांसौ	तस्थुषः	**द्वितीया**
तस्थुषा	तस्थिवद्भ्याम्	तस्थिवद्भिः	**तृतीया**
तस्थुषे	तस्थिवद्भ्याम्	तस्थिवद्भ्यः	**चतुर्थी**
तस्थुषः	तस्थिवद्भ्याम्	तस्थिवद्भ्यः	**पञ्चमी**
तस्थुषः	तस्थुषोः	तस्थुषाम्	**षष्ठी**
तस्थुषि	तस्थुषोः	तस्थिवत्सु	**सप्तमी**
हे तस्थिवन्	हे तस्थिवांसौ	हे तस्थिवांसः	**सम्बोधनम्**

९ वत्वन्तः पुंलिङ्गो भगवत्-शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
भगवान्	भगवन्तौ	भगवन्तः	**प्रथमा**
भगवन्तम्	भगवन्तौ	भगवतः	**द्वितीया**
भगवता	भगवद्भ्याम्	भगवद्भिः	**तृतीया**
भगवते	भगवद्भ्याम्	भगवद्भ्यः	**चतुर्थी**
भगवतः	भगवद्भ्याम्	भगवद्भ्यः	**पञ्चमी**
भगवतः	भगवतोः	भगवताम्	**षष्ठी**
भगवति	भगवतोः	भगवत्सु	**सप्तमी**
हे भगवन्	हे भगवन्तौ	हे भगवन्तः	**सम्बोधनम्**

१० नकारान्तः पुंलिङ्गो आत्मन्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
आत्मा	आत्मानौ	आत्मानः	**प्रथमा**
आत्मानम्	आत्मानौ	आत्मनः	**द्वितीया**
आत्मना	आत्मभ्याम्	आत्मभिः	**तृतीया**
आत्मने	आत्मभ्याम्	आत्मभ्यः	**चतुर्थी**
आत्मनः	आत्मभ्याम्	आत्मभ्यः	**पञ्चमी**
आत्मनः	आत्मनोः	आत्मनाम्	**षष्ठी**
आत्मनि	आत्मनोः	आत्मसु	**सप्तमी**
हे आत्मन्	हे आत्मानौ	हे आत्मानः	**सम्बोधनम्**

॥स्त्रीलिङ्गशब्दाः॥

रमा रुचिर्नदी धेनुर्वाग्धीः सरिदनन्तरम् ।

क्षुत्प्रावृट् च शरच्चैव दशैताः स्त्रीषु नायिकाः ॥

१ आकारान्तः स्त्रीलिङ्गो रमा-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
रमा	रमे	रमाः	**प्रथमा**
रमाम्	रमे	रमाः	**द्वितीया**
रमया	रमाभ्याम्	रमाभिः	**तृतीया**
रमायै	रमाभ्याम्	रमाभ्यः	**चतुर्थी**
रमायाः	रमाभ्याम्	रमाभ्यः	**पञ्चमी**
रमायाः	रमयोः	रमाणाम्	**षष्ठी**
रमायाम्	रमयोः	रमासु	**सप्तमी**

हे रमे	हे रमे	हे रमाः	**सम्बोधनम्**

२ इकारान्तः स्त्रीलिङ्गो रुचि-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
रुचिः	रुची	रचयः	**प्रथमा**
रुचिम्	रुची	रुचीः	**द्वितीया**
रुच्या	रुचिभ्याम्	रुचिभिः	**तृतीया**
रुच्यै, रुचये	रुचिभ्याम्	रुचिभ्यः	**चतुर्थी**
रुच्याः, रुचेः	रुचिभ्याम्	रुचिभ्यः	**पञ्चमी**
रुच्याः, रुचेः	रुच्योः	रुचीनाम्	**षष्ठी**
रुच्याम्,रुचौ	रुच्योः	रुचिषु	**सप्तमी**
हे रुचे	हे रुची	हे रुचयः	**सम्बोधनम्**

३ ईकारान्तः स्त्रीलिङ्गो नदी-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
नदी	नद्यौ	नद्यः	**प्रथमा**
नदीम्	नद्यौ	नदीः	**द्वितीया**
नद्या	नदीभ्याम्	नदीभिः	**तृतीया**
नद्यै	नदीभ्याम्	नदीभ्यः	**चतुर्थी**
नद्याः	नदीभ्याम्	नदीभ्यः	**पञ्चमी**
नद्याः	नद्योः	नदीनाम्	**षष्ठी**
नद्याम्	नद्योः	नदीषु	**सप्तमी**
हे नदि	हे नद्यौ	हे नद्यः	**सम्बोधनम्**

४ उकारान्तः स्त्रीलिङ्गो धेनु-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
धेनुः	धेनू	धेनवः	**प्रथमा**

धेनुम्	धेनू	धेनूः	**द्वितीया**
धेन्वा	धेनुभ्याम्	धेनुभिः	**तृतीया**
धेन्वै, धेनवे	धेनुभ्याम्	धेनुभ्यः	**चतुर्थी**
धेन्वाः, धेनोः	धेनुभ्याम्	धेनुभ्यः	**पञ्चमी**
धेन्वाः, धेनोः	धेन्वोः	धेनूनाम्	**षष्ठी**
धेन्वाम्, धेनौ	धेन्वोः	धेनुषु	**सप्तमी**
हे धेनो	हे धेनू	हे धेनवः	**सम्बोधनम्**

५ चकारान्तः स्त्रीलिङ्गो वाच्-शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
वाक्, वाग्	वाचौ	वाचः	**प्रथमा**
वाचम्	वाचौ	वाचः	**द्वितीया**
वाचा	वाग्भ्याम्	वाग्भिः	**तृतीया**
वाचे	वाग्भ्याम्	वाग्भ्यः	**चतुर्थी**
वाचः	वाग्भ्याम्	वाग्भ्यः	**पञ्चमी**
वाचः	वाचोः	वाचाम्	**षष्ठी**
वाचि	वाचोः	वाक्षु	**सप्तमी**
हे वाक्, वाग्	हे वाचौ	हे वाचः	**सम्बोधनम्**

६ ईकारान्तः स्त्रीलिङ्गो धी-शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
धीः	धियौ	धियः	**प्रथमा**
धियम्	धियौ	धियः	**द्वितीया**
धिया	धीभ्याम्	धीभिः	**तृतीया**
धियै, धिये	धीभ्याम्	धीभ्यः	**चतुर्थी**
धियाः, धियः	धीभ्याम्	धीभ्यः	**पञ्चमी**
धियाः, धियः	धियोः	धीनाम्, धीयाम्	**षष्ठी**
धियाम्, धियि	धियोः	धीषु	**सप्तमी**

हे धीः	हे धियौ	हे धियः	**सम्बोधनम्**

७ तकारान्तः स्त्रीलिङ्गो सरित्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सरित्	सरितौ	सरितः	**प्रथमा**
सरितम्	सरितौ	सरितः	**द्वितीया**
सरिता	सरिद्भ्याम्	सरिद्भिः	**तृतीया**
सरिते	सरिद्भ्याम्	सरिद्भ्यः	**चतुर्थी**
सरितः	सरिद्भ्याम्	सरिद्भ्यः	**पञ्चमी**
सरितः	सरितोः	सरिताम्	**षष्ठी**
सरिति	सरितोः	सरित्सु	**सप्तमी**
हे सरित्	हे सरितौ	हे सरितः	**सम्बोधनम्**

८ धकारान्तः स्त्रीलिङ्गो क्षुध्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
क्षुध्	क्षुधौ	क्षुधः	**प्रथमा**
क्षुधम्	क्षुधौ	क्षुधः	**द्वितीया**
क्षुधा	क्षुद्भ्याम्	क्षुद्भिः	**तृतीया**
क्षुधे	क्षुद्भ्याम्	क्षुद्भ्यः	**चतुर्थी**
क्षुधः	क्षुद्भ्याम्	क्षुद्भ्यः	**पञ्चमी**
क्षुधः	क्षुधोः	क्षुधाम्	**षष्ठी**
क्षुधि	क्षुधोः	क्षुत्सु	**सप्तमी**
हे क्षुत्, क्षुध्	हे क्षुधौ	हे क्षुधः	**सम्बोधनम्**

९ षकारान्तः स्त्रीलिङ्गो प्रावृष्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
प्रावृट्, प्रावृड्	प्रावृषौ	प्रावृषः	**प्रथमा**
प्रावृषम्	प्रावृषौ	प्रावृषः	**द्वितीया**
प्रावृषा	प्रावृड्भ्याम्	प्रावृड्भिः	**तृतीया**

प्रावृषे	प्रावृड्भ्याम्	प्रावृड्भ्यः	**चतुर्थी**
प्रावृषः	प्रावृड्भ्याम्	प्रावृड्भ्यः	**पञ्चमी**
प्रावृषः	प्रावृषोः	प्रावृषाम्	**षष्ठी**
प्रावृषि	प्रावृषोः	प्रावृट्सु	**सप्तमी**
हे प्रावृट्, प्रावृड्	हे प्रावृषौ	हे प्रावृषः	**सम्बोधनम्**

१० दकारान्तः स्त्रीलिङ्गो शरद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
शरद्	शरदौ	शरदः	**प्रथमा**
शरदम्	शरदौ	शरदः	**द्वितीया**
शरदा	शरद्भ्याम्	शरद्भिः	**तृतीया**
शरदे	शरद्भ्याम्	शरद्भ्यः	**चतुर्थी**
शरदः	शरद्भ्याम्	शरद्भ्यः	**पञ्चमी**
शरदः	शरदोः	शरदाम्	**षष्ठी**
शरदि	शरदोः	शरत्सु	**सप्तमी**
हे शरत्, शरद्	हे शरदौ	हे शरदः	**सम्बोधनम्**

||नपुंसकलिङ्गशब्दाः||

ज्ञानं दधि पयो वर्म धनुर्वारि जगत्तथा।

मधु नाम मनोहारि दशैतानि नपुंसके ॥

अकारान्तः नपुंसकलिङ्गो ज्ञान-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
ज्ञानम्	ज्ञाने	ज्ञानानि	**प्रथमा**
ज्ञानम्	ज्ञाने	ज्ञानानि	**द्वितीया**
ज्ञानेन	ज्ञानाभ्याम्	ज्ञानैः	**तृतीया**
ज्ञानाय	ज्ञानाभ्याम्	ज्ञानेभ्यः	**चतुर्थी**

ज्ञानात्	ज्ञानाभ्याम्	ज्ञानेभ्यः	**पञ्चमी**
ज्ञानस्य	ज्ञानयोः	ज्ञानानाम्	**षष्ठी**
ज्ञाने	ज्ञानयोः	ज्ञानेषु	**सप्तमी**
हे ज्ञान	हे ज्ञाने	हे ज्ञानानि	**सम्बोधनम्**

इकारान्तः नपुंसकलिङ्गो दधि-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
दधि	दधिनी	दधीनि	**प्रथमा**
दधि	दधिनी	दधीनि	**द्वितीया**
दध्ना	दधिभ्याम्	दधिभिः	**तृतीया**
दध्ने	दधिभ्याम्	दधिभ्यः	**चतुर्थी**
दध्नः	दधिभ्याम्	दधिभ्यः	**पञ्चमी**
दध्नः	दध्नोः	दध्नाम्	**षष्ठी**
दध्नि, दधिनि	दध्नोः	दधिषु	**सप्तमी**
हे दधे, दधि	हे दधिनी	हे दधीनि	**सम्बोधनम्**

सकारान्तः नपुंसकलिङ्गो पयस्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
पयः	पयसी	पयांसि	**प्रथमा**
पयः	पयसी	पयांसि	**द्वितीया**
पयसा	पयोभ्याम्	पयोभिः	**तृतीया**
पयसे	पयोभ्याम्	पयोभ्यः	**चतुर्थी**
पयसः	पयोभ्याम्	पयोभ्यः	**पञ्चमी**
पयसः	पयसोः	पयसाम्	**षष्ठी**
पयसि	पयसोः	पयस्सु	**सप्तमी**
हे पयः	हे पयसी	हे पयांसि	**सम्बोधनम्**

नकारान्तः नपुंसकलिङ्गो वर्मन्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
वर्म	वर्मणी	वर्माणि	**प्रथमा**
वर्म	वर्मणी	वर्माणि	**द्वितीया**
वर्मणा	वर्मभ्याम्	वर्मभिः	**तृतीया**
वर्मणे	वर्मभ्याम्	वर्मभ्यः	**चतुर्थी**
वर्मणः	वर्मभ्याम्	वर्मभ्यः	**पञ्चमी**
वर्मणः	वर्मणोः	वर्मणाम्	**षष्ठी**
वर्मणि	वर्मणोः	वर्मसु	**सप्तमी**
हे वर्मन्, वर्म	हे वर्मणी	हे वर्माणि	**सम्बोधनम्**

सकारान्तः नपुंसकलिङ्गो धनुस्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
धनुः	धनुषी	धनूंषि	**प्रथमा**
धनुः	धनुषी	धनूंषि	**द्वितीया**
धनुषा	धनुर्भ्याम्	धनुर्भिः	**तृतीया**
धनुषे	धनुर्भ्याम्	धनुर्भ्यः	**चतुर्थी**
धनुषः	धनुर्भ्याम्	धनुर्भ्यः	**पञ्चमी**
धनुषः	धनुषोः	धनुषाम्	**षष्ठी**
धनुषि	धनुषोः	धनुष्षु	**सप्तमी**
हे धनुः	हे धनुषी	हे धनूंषि	**सम्बोधनम्**

इकारान्तः नपुंसकलिङ्गो वारि शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
वारि	वारिणी	वारीणि	**प्रथमा**
वारि	वारिणी	वारीणि	**द्वितीया**
वारिणा	वारिभ्याम्	वारिभिः	**तृतीया**
वारिणे	वारिभ्याम्	वारिभ्यः	**चतुर्थी**

वारिणः	वारिभ्याम्	वारिभ्यः	**पञ्चमी**
वारिणः	वारिणोः	वारीणाम्	**षष्ठी**
वारिणि	वारिणोः	वारिषु	**सप्तमी**
हे वारे, वारि	हे वारिणी	हे वारीणि	**सम्बोधनम्**

तकारान्तः नपुंसकलिङ्गो जगत्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
जगत्	जगती	जगन्ति	**प्रथमा**
जगत्	जगती	जगन्ति	**द्वितीया**
जगता	जगद्भ्याम्	जगद्भिः	**तृतीया**
जगते	जगद्भ्याम्	जगद्भ्यः	**चतुर्थी**
जगतः	जगद्भ्याम्	जगद्भ्यः	**पञ्चमी**
जगतः	जगतोः	जगताम्	**षष्ठी**
जगति	जगतोः	जगत्सु	**सप्तमी**
हे जगत्	हे जगती	हे जगन्ति	**सम्बोधनम्**

उकारान्तः नपुंसकलिङ्गो मधु-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
मधु	मधुनी	मधूनि	**प्रथमा**
मधु	मधुनी	मधूनि	**द्वितीया**
मधुना	मधुभ्याम्	मधुभिः	**तृतीया**
मधुने	मधुभ्याम्	मधुभ्यः	**चतुर्थी**
मधुनः	मधुभ्याम्	मधुभ्यः	**पञ्चमी**
मधुनः	मधुनोः	मधूनाम्	**षष्ठी**
मधुनि	मधुनोः	मधुषु	**सप्तमी**
हे मधो, मधु	हे मधुनी	हे मधूनि	**सम्बोधनम्**

नकारान्तः नपुंसकलिङ्गो नामन्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
नाम	नामनी,नाम्नी	नामानि	**प्रथमा**
नाम	नामनी,नाम्नी	नामानि	**द्वितीया**
नाम्ना	नामभ्याम्	नामभिः	**तृतीया**
नाम्ने	नामभ्याम्	नामभ्यः	**चतुर्थी**
नाम्नः	नामभ्याम्	नामभ्यः	**पञ्चमी**
नाम्नः	नाम्नोः	नाम्नाम्	**षष्ठी**
नाम्नि,नामनि	नाम्नोः	नामसु	**सप्तमी**
हे नाम, नामन्	हे नामनी,नाम्नी	हे नामानि	**सम्बोधनम्**

इन्नन्तः नपुंसकलिङ्गो मनोहारिन्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
मनोहारि	मनोहारिणी	मनोहारीणि	**प्रथमा**
मनोहारि	मनोहारिणी	मनोहारीणि	**द्वितीया**
मनोहारिणा	मनोहारिभ्याम्	मनोहारिभिः	**तृतीया**
मनोहारिणे	मनोहारिभ्याम्	मनोहारिभ्यः	**चतुर्थी**
मनोहारिणः	मनोहारिभ्याम्	मनोहारिभ्यः	**पञ्चमी**
मनोहारिणः	मनोहारिणोः	मनोहारिणाम्	**षष्ठी**
मनोहारिणि	मनोहारिणोः	मनोहारिषु	**सप्तमी**
हे मनोहारिन्, मनोहारि	हे मनोहारिणी	हे मनोहारीणि	**सम्बोधनम्**

||सर्वनामानि||

स सा तद्यश्च या यच्च कः का किं त्वमहं त्वयम् ।

इयं चेदं चैष चैषा चैतच्चासावसावदः ॥

दकारान्तः पुंलिङ्गो तद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सः	तौ	ते	**प्रथमा**
तम्	तौ	तान्	**द्वितीया**
तेन	ताभ्याम्	तैः	**तृतीया**
तस्मै	ताभ्याम्	तेभ्यः	**चतुर्थी**
तस्मात्	ताभ्याम्	तेभ्यः	**पञ्चमी**
तस्य	तयोः	तेषाम्	**षष्ठी**
तस्मिन्	तयोः	तेषु	**सप्तमी**

दकारान्तः स्त्रीलिङ्गो तद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सा	ते	ताः	**प्रथमा**
ताम्	ते	ताः	**द्वितीया**
तया	ताभ्याम्	ताभिः	**तृतीया**
तस्यै	ताभ्याम्	ताभ्यः	**चतुर्थी**
तस्याः	ताभ्याम्	ताभ्यः	**पञ्चमी**
तस्याः	तयोः	तासाम्	**षष्ठी**
तस्याम्	तयोः	तासु	**सप्तमी**

दकारान्तः नपुंसकलिङ्गो तद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
तत्	ते	तानि	**प्रथमा**
तत्	ते	तानि	**द्वितीया**
तेन	ताभ्याम्	तैः	**तृतीया**
तस्मै	ताभ्याम्	तेभ्यः	**चतुर्थी**
तस्मात्	ताभ्याम्	तेभ्यः	**पञ्चमी**
तस्य	तयोः	तेषाम्	**षष्ठी**
तस्मिन्	तयोः	तेषु	**सप्तमी**

दकारान्तः पुंलिङ्गो यद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
यः	यौ	ये	**प्रथमा**
यम्	यौ	यान्	**द्वितीया**
येन	याभ्याम्	यैः	**तृतीया**
यस्मै	याभ्याम्	येभ्यः	**चतुर्थी**
यस्मात्	याभ्याम्	येभ्यः	**पञ्चमी**
यस्य	ययोः	येषाम्	**षष्ठी**
यस्मिन्	ययोः	येषु	**सप्तमी**

दकारान्तः स्त्रीलिङ्गो यद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
या	ये	याः	**प्रथमा**
याम्	ये	याः	**द्वितीया**
यया	याभ्याम्	याभिः	**तृतीया**
यस्यै	याभ्याम्	याभ्यः	**चतुर्थी**
यस्याः	याभ्याम्	याभ्यः	**पञ्चमी**
यस्याः	ययोः	यासाम्	**षष्ठी**

यस्याम्	ययोः	यासु	**सप्तमी**

दकारान्तः नपुंसकलिङ्गो यद्- शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
यत्	ये	यानि	**प्रथमा**
यत्	ये	यानि	**द्वितीया**
येन	याभ्याम्	यैः	**तृतीया**
यस्मै	याभ्याम्	येभ्यः	**चतुर्थी**
यस्मात्	याभ्याम्	येभ्यः	**पञ्चमी**
यस्य	ययोः	येषाम्	**षष्ठी**
यस्मिन्	ययोः	येषु	**सप्तमी**

मकारान्तः पुंलिङ्गो किम्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
कः	कौ	के	**प्रथमा**
कम्	कौ	कान्	**द्वितीया**
केन	काभ्याम्	कैः	**तृतीया**
कस्मै	काभ्याम्	केभ्यः	**चतुर्थी**
कस्मात्	काभ्याम्	केभ्यः	**पञ्चमी**
कस्य	कयोः	केषाम्	**षष्ठी**
कस्मिन्	कयोः	केषु	**सप्तमी**

मकारान्तः स्त्रीलिङ्गो किम्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
का	के	काः	**प्रथमा**
काम्	के	काः	**द्वितीया**
कया	काभ्याम्	काभिः	**तृतीया**
कस्यै	काभ्याम्	काभ्यः	**चतुर्थी**
कस्याः	काभ्याम्	काभ्यः	**पञ्चमी**

कस्याः	कयोः	कासाम्	**षष्ठी**
कास्याम्	कयोः	कासु	**सप्तमी**

मकारान्तः नपुंसकलिङ्गो किम्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
किम्	के	कानि	**प्रथमा**
किम्	के	कानि	**द्वितीया**
केन	काभ्याम्	कैः	**तृतीया**
कस्मै	काभ्याम्	केभ्यः	**चतुर्थी**
कस्मात्	काभ्याम्	केभ्यः	**पञ्चमी**
कस्य	कयोः	केषाम्	**षष्ठी**
कस्मिन्	कयोः	केषु	**सप्तमी**

त्रिषु लिङ्गेषु समानः दकारान्तः युष्मद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
त्वम्	युवाम्	यूयम्	**प्रथमा**
त्वाम्,त्वा	युवाम्,वाम्	युष्मान्,वः	**द्वितीया**
त्वया	युवाभ्याम्	युष्माभिः	**तृतीया**
तुभ्यम्, ते	युवाभ्याम्,वाम्	युष्मभ्यम् वः	**चतुर्थी**
त्वत्	युवाभ्याम्	युष्मत्	**पञ्चमी**
तव,ते	युवयोः,वाम्	युष्माकम्,वः	**षष्ठी**
त्वयि	युवयोः	युष्मासु	**सप्तमी**

त्रिषु लिङ्गेषु समानः दकारान्तः अस्मद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
अहम्	आवाम्	वयम्	**प्रथमा**
माम्,मा	आवाम्,नौ	अस्मान्,नः	**द्वितीया**
मया	आवाभ्याम्	अस्माभिः	**तृतीया**
मह्यम्,मे	आवाभ्याम्,नौ	अस्मभ्यम्,नः	**चतुर्थी**

मत्	आवाभ्याम्	अस्मत्	**पञ्चमी**
मम,मे	आवयोः,नौ	अस्माकम्,नः	**षष्ठी**
मयि	आवयोः	अस्मासु	**सप्तमी**

मकारान्तः पुंलिङ्गो इदम्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
अयम्	इमौ	इमे	**प्रथमा**
इमम्,एनम्	इमौ,एनौ	इमान्,एनान्	**द्वितीया**
अनेन,एनेन	आभ्याम्	एभिः	**तृतीया**
अस्मै	आभ्याम्	एभ्यः	**चतुर्थी**
अस्मात्	आभ्याम्	एभ्यः	**पञ्चमी**
अस्य	अनयोः,एनयोः	एषाम्	**षष्ठी**
अस्मिन्	अनयोः,एनयोः	एषु	**सप्तमी**

मकारान्तः स्त्रीलिङ्गो इदम्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
इयम्	इमे	इमाः	**प्रथमा**
इमाम्,एनाम्	इमे,एने	इमाः,एनाः	**द्वितीया**
अनया,एनया	आभ्याम्	आभिः	**तृतीया**
अस्यै	आभ्याम्	आभ्यः	**चतुर्थी**
अस्याः	आभ्याम्	आभ्यः	**पञ्चमी**
अस्याः	अनयोः	आसाम्	**षष्ठी**
अस्याम्	अनयोः	आसु	**सप्तमी**

मकारान्तः नपुंसकलिङ्गो इदम्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
इदम्	इमे	इमानि	**प्रथमा**

इदम्,एनत्	इमे,एने	इमानि,एनानि	**द्वितीया**
अनेन,एनेन	आभ्याम्	एभिः	**तृतीया**
अस्मै	आभ्याम्	एभ्यः	**चतुर्थी**
अस्मात्	आभ्याम्	एभ्यः	**पञ्चमी**
अस्य	अनयोः,एनयोः	एषाम्	**षष्ठी**
अस्मिन्	अनयोः,एनयोः	एषु	**सप्तमी**

दकारान्तः पुंलिङ्गो एतद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
एषः	एतौ	एते	**प्रथमा**
एतम्,एनम्	एतौ,एनौ	एतान्,एनान्	**द्वितीया**
एतेन,एनेन	एताभ्याम्	एतैः	**तृतीया**
एतस्मै	एताभ्याम्	एतेभ्यः	**चतुर्थी**
एतस्मात्	एताभ्याम्	एतेभ्यः	**पञ्चमी**
एतस्य	एतयोः,एनयोः	एतेषाम्	**षष्ठी**
एतस्मिन्	एतयोः,एनयोः	एतेषु	**सप्तमी**

दकारान्तः स्त्रीलिङ्गो एतद्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
एषा	एते	एताः	**प्रथमा**
एताम्,एनाम्	एते,एने	एताः,एनाः	**द्वितीया**
एतया,एनया	एताभ्याम्	एताभिः	**तृतीया**
एतस्यै	एताभ्याम्	एताभ्यः	**चतुर्थी**
एतस्याः	एताभ्याम्	एताभ्यः	**पञ्चमी**
एतस्याः	एतयोः, एनयोः	एतासाम्	**षष्ठी**
एतस्याम्	एतयोः, एनयोः	एतासु	**सप्तमी**

दकारान्तः नपुंसकलिङ्गो एतद्-शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
एतद्	एते	एतानि	**प्रथमा**
एतत्, एनत्	एते, एने	एतानि, एनानि	**द्वितीया**
एतेन, एनेन	एताभ्याम्	एतैः	**तृतीया**
एतस्मै	एताभ्याम्	एतेभ्यः	**चतुर्थी**
एतस्मात्	एताभ्याम्	एतेभ्यः	**पञ्चमी**
एतस्य	एतयोः, एनयोः	एतेषाम्	**षष्ठी**
एतस्मिन्	एतयोः, एनयोः	एतेषु	**सप्तमी**

सकारान्तः पुंलिङ्गो अदस्-शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
असौ	अमू	अमी	**प्रथमा**
अमुम्	अमू	अमून्	**द्वितीया**
अमुना	अमूभ्याम्	अमीभिः	**तृतीया**
अमुष्मै	अमूभ्याम्	अमीभ्यः	**चतुर्थी**
अमुष्मात्	अमूभ्याम्	अमीभ्यः	**पञ्चमी**
अमुष्य	अमुयोः	अमीषाम्	**षष्ठी**
अमुष्मिन्	अमुयोः	अमीषु	**सप्तमी**

सकारान्तः स्त्रीलिङ्गो अदस्-शब्दः

एकवचनम्	द्विवचनम्	बहुवचनम्	विभक्तिः
असौ	अमू	अमूः	**प्रथमा**
अमुम्	अमू	अमूः	**द्वितीया**
अमुया	अमूभ्याम्	अमूभिः	**तृतीया**
अमुष्यै	अमूभ्याम्	अमूभ्यः	**चतुर्थी**
अमुष्याः	अमूभ्याम्	अमूभ्यः	**पञ्चमी**
अमुष्याः	अमुयोः	अमूषाम्	**षष्ठी**
अमुष्याम्	अमुयोः	अमूषु	**सप्तमी**

सकारान्तः नपुंसकलिङ्गो अदस्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
अदः	अमू	अमूनि	**प्रथमा**
अदः	अमू	अमूनि	**द्वितीया**
अमुना	अमूभ्याम्	अमीभिः	**तृतीया**
अमुष्मै	अमूभ्याम्	अमीभ्यः	**चतुर्थी**
अमुष्मात्	अमूभ्याम्	अमीभ्यः	**पञ्चमी**
अमुष्य	अमुयोः	अमीषाम्	**षष्ठी**
अमुष्मिन्	अमुयोः	अमीषु	**सप्तमी**

पिता माता स्वसा गौर्नौः स्रग्भू राजा पतिः सखा ।

हाहा गोपा पपीर्हूहूश्चमूः स्त्री कति दिक् प्रधीः ॥

ऋकारान्तः पुंलिङ्गो पितृ-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
पिता	पितरौ	पितरः	**प्रथमा**
पितरम्	पितरौ	पितॄन्	**द्वितीया**
पित्रा	पितृभ्याम्	पितृभिः	**तृतीया**
पित्रे	पितृभ्याम्	पितृभ्यः	**चतुर्थी**
पितुः	पितृभ्याम्	पितृभ्यः	**पञ्चमी**
पितुः	पित्रोः	पितॄणाम्	**षष्ठी**
पितरि	पित्रोः	पितृषु	**सप्तमी**
हे पितः	हे पितरौ	हे पितरः	**सम्बोधनम्**

ऋकारान्तः स्त्रीलिङ्गो मातृ-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
माता	मातरौ	मातरः	**प्रथमा**
मातरम्	मातरौ	मातॄः	**द्वितीया**
मात्रा	मातृभ्याम्	मातृभिः	**तृतीया**
मात्रे	मातृभ्याम्	मातृभ्यः	**चतुर्थी**
मातुः	मातृभ्याम्	मातृभ्यः	**पञ्चमी**
मातुः	मात्रोः	मातॄणाम्	**षष्ठी**
मातरि	मात्रोः	मातृषु	**सप्तमी**
हे मातः	हे मातरौ	हे मातरः	**सम्बोधनम्**

ऋकारान्तः स्त्रीलिङ्गो स्वसृ-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
स्वसा	स्वसारौ	स्वसारः	**प्रथमा**
स्वसारम्	स्वसारौ	स्वसॄः	**द्वितीया**
स्वस्रा	स्वसृभ्याम्	स्वसृभिः	**तृतीया**
स्वस्रे	स्वसृभ्याम्	स्वसृभ्यः	**चतुर्थी**
स्वसुः	स्वसृभ्याम्	स्वसृभ्यः	**पञ्चमी**
स्वसुः	स्वस्रोः	स्वसॄणाम्	**षष्ठी**
स्वसरि	स्वस्रोः	स्वसृषु	**सप्तमी**
हे स्वसः	हे स्वसारौ	हे स्वसारः	**सम्बोधनम्**

ओकारान्तः उभयलिङ्गो गो-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
गौः	गावौ	गावः	**प्रथमा**
गाम्	गावौ	गाः	**द्वितीया**

गवा	गोभ्याम्	गोभिः	**तृतीया**
गवे	गोभ्याम्	गोभ्यः	**चतुर्थी**
गोः	गोभ्याम्	गोभ्यः	**पञ्चमी**
गोः	गवोः	गवाम्	**षष्ठी**
गवि	गवोः	गोषु	**सप्तमी**
हे गौः	हे गावौ	हे गावः	**सम्बोधनम्**

औकारान्तः स्त्रीलिङ्गो नौ-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
नौः	नावौ	नावः	**प्रथमा**
नावम्	नावौ	नावः	**द्वितीया**
नावा	नौभ्याम्	नौभिः	**तृतीया**
नावे	नौभ्याम्	नौभ्यः	**चतुर्थी**
नावः	नौभ्याम्	नौभ्यः	**पञ्चमी**
नावः	नावोः	नावाम्	**षष्ठी**
नावि	नावोः	नौषु	**सप्तमी**
हे नौः	हे नावौ	हे नावः	**सम्बोधनम्**

जकारान्तः स्त्रीलिङ्गो स्रज्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
स्रक्	स्रजौ	स्रजः	**प्रथमा**
स्रजम्	स्रजौ	स्रजः	**द्वितीया**
स्रजा	स्रग्भ्याम्	स्रग्भिः	**तृतीया**
स्रजे	स्रग्भ्याम्	स्रग्भ्यः	**चतुर्थी**
स्रजः	स्रग्भ्याम्	स्रग्भ्यः	**पञ्चमी**
स्रजः	स्रजोः	स्रजाम्	**षष्ठी**
स्रजि	स्रजोः	स्रक्षु	**सप्तमी**
हे स्रक्	हे स्रजौ	हे स्रजः	**सम्बोधनम्**

ऊकारान्तः स्त्रीलिङ्गो भू-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
भूः	भुवौ	भुवः	**प्रथमा**
भुवम्	भुवौ	भुवः	**द्वितीया**
भुवा	भूभ्याम्	भूभिः	**तृतीया**
भुवै, भुवे	भूभ्याम्	भूभ्यः	**चतुर्थी**
भुवाः, भुवः	भूभ्याम्	भूभ्यः	**पञ्चमी**
भुवाः,भुवः	भुवोः	भूनाम्,भूवाम्	**षष्ठी**
भुवाम्,भुवि	भुवोः	भूषु	**सप्तमी**
हे भूः	हे भुवौ	हे भुवः	**सम्बोधनम्**

नान्तः पुंलिङ्गो राजन्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
राजा	राजानौ	राजानः	**प्रथमा**
राजानम्	राजानौ	राज्ञः	**द्वितीया**
राज्ञा	राजभ्याम्	राजभिः	**तृतीया**
राज्ञे	राजभ्याम्	राजभ्यः	**चतुर्थी**
राज्ञः	राजभ्याम्	राजभ्यः	**पञ्चमी**
राज्ञः	राज्ञोः	राज्ञाम्	**षष्ठी**
राज्ञि,राजनि	राज्ञोः	राजसु	**सप्तमी**
हे राजन्	हे राजनौ	हे राजानः	**सम्बोधनम्**

इकारान्तः पुंलिङ्गो पति-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
पतिः	पती	पतयः	**प्रथमा**
पतिम्	पती	पतीन्	**द्वितीया**
पत्या	पतिभ्याम्	पतिभिः	**तृतीया**

पत्ये	पतिभ्याम्	पतिभ्यः	**चतुर्थी**
पत्युः	पतिभ्याम्	पतिभ्यः	**पञ्चमी**
पत्युः	पत्योः	पतीनाम्	**षष्ठी**
पत्यौ	पत्योः	पतिषु	**सप्तमी**
हे पते	हे पती	हे पतयः	**सम्बोधनम्**

इकारान्तः पुंलिङ्गो-सखि शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सखा	सखायौ	सखायः	**प्रथमा**
सखायम्	सखायौ	सखीन्	**द्वितीया**
सख्या	सखिभ्याम्	सखिभिः	**तृतीया**
सख्ये	सखिभ्याम्	सखिभ्यः	**चतुर्थी**
सख्युः	सखिभ्याम्	सखिभ्यः	**पञ्चमी**
सख्युः	सख्योः	सखीनाम्	**षष्ठी**
सख्यौ	सख्योः	सखिषु	**सप्तमी**
हे सखे	हे सखायौ	हे सखायः	**सम्बोधनम्**

आकारान्तः पुंलिङ्गो हाहा-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
हाहाः	हाहौ	हाहाः	**प्रथमा**
हाहाम्	हाहौ	हाहान्	**द्वितीया**
हाहा	हाहाभ्याम्	हाहाभिः	**तृतीया**
हाहै	हाहाभ्याम्	हाहाभ्यः	**चतुर्थी**
हाहाः	हाहाभ्याम्	हाहाभ्यः	**पञ्चमी**
हाहाः	हाहौः	हाहाम्	**षष्ठी**
हाहे	हाहौः	हाहासु	**सप्तमी**
हे हाहाः	हे हाहौ	हे हाहाः	**सम्बोधनम्**

आकारान्तः उभयलिङ्गो गोपा- शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
गोपाः	गोपौ	गोपाः	**प्रथमा**
गोपाम्	गोपौ	गोपः	**द्वितीया**
गोपा	गोपाभ्याम्	गोपाभिः	**तृतीया**
गोपे	गोपाभ्याम्	गोपाभ्यः	**चतुर्थी**
गोपः	गोपाभ्याम्	गोपाभ्यः	**पञ्चमी**
गोपः	गोपोः	गोपाम्	**षष्ठी**
गोपि	गोपोः	गोपासु	**सप्तमी**
हे गोपाः	हे गोपौ	हे गोपाः	**सम्बोधनम्**

ईकारान्तः पुंलिङ्गो पपी-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
पपीः	पप्यौ	पप्यः	**प्रथमा**
पपीम्	पप्यौ	पपीन्	**द्वितीया**
पप्या	पपीभ्याम्	पपीभिः	**तृतीया**
पप्ये	पपीभ्याम्	पपीभ्यः	**चतुर्थी**
पप्यः	पपीभ्याम्	पपीभ्यः	**पञ्चमी**
पप्यः	पप्योः	पप्याम्	**षष्ठी**
पपी	पप्योः	पपीषु	**सप्तमी**
हे पपीः	हे पप्यौ	हे पप्यः	**सम्बोधनम्**

ऊकारान्तः पुंलिङ्गो हूहूशब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
हूहूः	हूह्वौ	हूह्वः	**प्रथमा**
हूहूम्	हूह्वौ	हूहून्	**द्वितीया**
हूह्वा	हूहूभ्याम्	हूहूभिः	**तृतीया**

हूह्वे	हूहूभ्याम्	हूहूभ्यः	**चतुर्थी**
हूह्वः	हूहूभ्याम्	हूहूभ्यः	**पञ्चमी**
हूह्वः	हूह्वोः	हूह्वाम्	**षष्ठी**
हूह्वि	हूह्वोः	हूहूषु	**सप्तमी**
हे हूहूः	हे हूह्वौ	हे हूह्वः	**सम्बोधनम्**

ऊकारान्तः स्त्रीलिङ्गो चमू-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
चमूः	चम्वौ	चम्वः	**प्रथमा**
चमूम्	चम्वौ	चमूः	**द्वितीया**
चम्वा	चमूभ्याम्	चमूभिः	**तृतीया**
चम्वै	चमूभ्याम्	चमूभ्यः	**चतुर्थी**
चम्वाः	चमूभ्याम्	चमूभ्यः	**पञ्चमी**
चम्वाः	चम्वोः	चमूनाम्	**षष्ठी**
चम्वाम्	चम्वोः	चमूषु	**सप्तमी**
हे चमु	हे चम्वौ	हे चम्वः	**सम्बोधनम्**

ईकारान्तः स्त्रीलिङ्गो स्त्री-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
स्त्री	स्त्रियौ	स्त्रियः	**प्रथमा**
स्त्रियम्,स्त्रीम्	स्त्रियौ	स्त्रियः,स्त्रीः	**द्वितीया**
स्त्रिया	स्त्रीभ्याम्	स्त्रीभिः	**तृतीया**
स्त्रियै	स्त्रीभ्याम्	स्त्रीभ्यः	**चतुर्थी**
स्त्रियाः	स्त्रीभ्याम्	स्त्रीभ्यः	**पञ्चमी**
स्त्रियाः	स्त्रियोः	स्त्रीणाम्	**षष्ठी**
स्त्रियाम्	स्त्रियोः	स्त्रीषु	**सप्तमी**
हे स्त्रि	हे स्त्रियौ	हे स्त्रियः	**सम्बोधनम्**

त्रिषु लिङ्गेषु समानः कतिशब्दः(नि. बहु.)	
बहुवचनम्	**विभक्तिः**
कति	**प्रथमा**
कति	**द्वितीया**
कतिभिः	**तृतीया**
कतिभ्यः	**चतुर्थी**
कतिभ्यः	**पञ्चमी**
कतीनाम्	**षष्ठी**
कतिषु	**सप्तमी**
हे कति	**सम्बोधनम्**

सुलूर्यवक्रीश्चानड्वान्पंथा ज्यायान्महान्स्वभूः ।

सर्वः सर्वा च सर्वं च द्वित्र्यादिश्च गणस्तथा ॥

ऊकारान्तः पुंलिङ्गो सुलूशब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सुलूः	सुल्वौ	सुल्वः	**प्रथमा**
सुल्वम्	सुल्वौ	सुल्वः	**द्वितीया**
सुल्वा	सुलूभ्याम्	सुलूभिः	**तृतीया**
सुल्वे	सुलूभ्याम्	सुलूभ्यः	**चतुर्थी**
सुल्वः	सुलूभ्याम्	सुलूभ्यः	**पञ्चमी**
सुल्वः	सुल्वोः	सुल्वाम्	**षष्ठी**
सुल्वि	सुल्वोः	सुलूषु	**सप्तमी**
हे सुलूः	हे सुल्वौ	हे सुल्वः	**सम्बोधनम्**

ईकारान्तः स्त्रीलिङ्गो यवक्री-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
यवक्रीः	यवक्रियौ	यवक्रियः	**प्रथमा**
यवक्रियम्	यवक्रियौ	यवक्रियः	**द्वितीया**
यवक्रिया	यवक्रीभ्याम्	यवक्रीभिः	**तृतीया**
यवक्रिये	यवक्रीभ्याम्	यवक्रीभ्यः	**चतुर्थी**
यवक्रियः	यवक्रीभ्याम्	यवक्रीभ्यः	**पञ्चमी**
यवक्रियः	यवक्रियोः	यवक्रियाम्	**षष्ठी**
यवक्रियि	यवक्रियोः	यवक्रीषु	**सप्तमी**
हे यवक्रीः	हे यवक्रियौ	हे यवक्रियः	**सम्बोधनम्**

हकारान्तः पुंलिङ्गो अनडुह्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
अनड्वान्	अनड्वाहौ	अनड्वाहः	**प्रथमा**
अनड्वाहम्	अनड्वाहौ	अनडुहः	**द्वितीया**
अनडुहा	अनडुद्भ्याम्	अनडुद्भिः	**तृतीया**
अनडुहे	अनडुद्भ्याम्	अनडुद्भ्यः	**चतुर्थी**
अनडुहः	अनडुद्भ्याम्	अनडुद्भ्यः	**पञ्चमी**
अनडुहः	अनडुहोः	अनडुहाम्	**षष्ठी**
अनडुहि	अनडुहोः	अनडुत्सु	**सप्तमी**
हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः	**सम्बोधनम्**

इन्नन्तः पुंलिङ्गो पथिन्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
पन्थाः	पन्थानौ	पन्थानः	**प्रथमा**
पन्थानम्	पन्थानौ	पथः	**द्वितीया**

पथा	पथिभ्याम्	पथिभिः	**तृतीया**
पथे	पथिभ्याम्	पथिभ्यः	**चतुर्थी**
पथः	पथिभ्याम्	पथिभ्यः	**पञ्चमी**
पथः	पथोः	पथाम्	**षष्ठी**
पथि	पथोः	पथिषु	**सप्तमी**
हे पन्थाः	हे पन्थानौ	हे पन्थानः	**सम्बोधनम्**

सान्तः पुंलिङ्गो ज्यायस्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
ज्यायान्	ज्यायांसौ	ज्यायांसः	**प्रथमा**
ज्यायांसम्	ज्यायांसौ	ज्यायसः	**द्वितीया**
ज्यायसा	ज्यायोभ्याम्	ज्यायोभिः	**तृतीया**
ज्यायसे	ज्यायोभ्याम्	ज्यायोभ्यः	**चतुर्थी**
ज्यायसः	ज्यायोभ्याम्	ज्यायोभ्यः	**पञ्चमी**
ज्यायसः	ज्यायसोः	ज्यायसाम्	**षष्ठी**
ज्यायसि	ज्यायसोः	ज्यायस्सु	**सप्तमी**
हे ज्यायन्	हे ज्यायांसौ	हे ज्यायांसः	**सम्बोधनम्**

तकारान्तः पुंलिङ्गो महत्-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
महान्	महान्तौ	महान्तः	**प्रथमा**
महान्तम्	महान्तौ	महतः	**द्वितीया**
महता	महद्भ्याम्	महद्भिः	**तृतीया**
महते	महद्भ्याम्	महद्भ्यः	**चतुर्थी**
महतः	महद्भ्याम्	महद्भ्यः	**पञ्चमी**
महतः	महतोः	महताम्	**षष्ठी**
महति	महतोः	महत्सु	**सप्तमी**
हे महान्	हे महान्तौ	हे महान्तः	**सम्बोधनम्**

ऊकारान्तः पुंलिङ्गो स्वभू-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
स्वभूः	स्वभुवौ	स्वभुवः	**प्रथमा**
स्वभुवम्	स्वभुवौ	स्वभुवः	**द्वितीया**
स्वभुवा	स्वभूभ्याम्	स्वभूभिः	**तृतीया**
स्वभुवे	स्वभूभ्याम्	स्वाभूभ्यः	**चतुर्थी**
स्वभुवः	स्वभूभ्याम्	स्वभूभ्यः	**पञ्चमी**
स्वभुवः	स्वभुवोः	स्वभुवाम्	**षष्ठी**
स्वभुवि	स्वभुवोः	स्वभूषु	**सप्तमी**
हे स्वभूः	हे स्वभुवौ	हे स्वभुवः	**सम्बोधनम्**

अकारान्तः पुंलिङ्गो सर्व-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सर्वः	सर्वौ	सर्वे	**प्रथमा**
सर्वम्	सर्वौ	सर्वान्	**द्वितीया**
सर्वेण	सर्वाभ्याम्	सर्वैः	**तृतीया**
सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	**चतुर्थी**
सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः	**पञ्चमी**
सर्वस्य	सर्वयोः	सर्वेषाम्	**षष्ठी**
सर्वस्मिन्	सर्वयोः	सर्वेषु	**सप्तमी**

अकारान्तः स्त्रीलिङ्गो सर्व-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सर्वा	सर्वे	सर्वाः	**प्रथमा**
सर्वाम्	सर्वे	सर्वाः	**द्वितीया**
सर्वया	सर्वाभ्याम्	सर्वाभिः	**तृतीया**
सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः	**चतुर्थी**
सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः	**पञ्चमी**

सर्वस्याः	सर्वयोः	सर्वासाम्	**षष्ठी**
सर्वस्याम्	सर्वयोः	सर्वासु	**सप्तमी**

अकारान्तः नपुंसकलिङ्गो सर्व-शब्दः			
एकवचनम्	द्विवचनम्	बहुवचनम्	**विभक्तिः**
सर्वम्	सर्वे	सर्वाणि	**प्रथमा**
सर्वम्	सर्वे	सर्वाणि	**द्वितीया**
सर्वेण	सर्वाभ्याम्	सर्वैः	**तृतीया**
सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	**चतुर्थी**
सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः	**पञ्चमी**
सर्वस्य	सर्वयोः	सर्वेषाम्	**षष्ठी**
सर्वस्मिन्	सर्वयोः	सर्वेषु	**सप्तमी**

इकारान्तः द्वि-शब्दः (नि.द्वि)			
पुंसि	स्त्रियाम्	नपुंसके	**विभक्तिः**
द्वौ	द्वे	द्वे	**प्रथमा**
द्वौ	द्वे	द्वे	**द्वितीया**
द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	**तृतीया**
द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	**चतुर्थी**
द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्	**पञ्चमी**
द्वयोः	द्वयोः	द्वयोः	**षष्ठी**
द्वयोः	द्वयोः	द्वयोः	**सप्तमी**

इकारान्तः त्रि-शब्दः			
पुंसि	स्त्रियाम्	नपुंसके	**विभक्तिः**
त्रयः	तिस्रः	त्रीणि	**प्रथमा**
त्रीन्	तिस्रः	त्रीणि	**द्वितीया**
त्रिभिः	तिसृभिः	त्रिभिः	**तृतीया**
त्रिभ्यः	तिसृभ्यः	त्रिभ्यः	**चतुर्थी**

त्रिभ्यः	तिसृभ्यः	त्रिभ्यः	**पञ्चमी**
त्रयाणाम्	तिसृणाम्	त्रयाणाम्	**षष्ठी**
त्रिषु	तिसृषु	त्रिषु	**सप्तमी**

चतुर्-शब्दः

पुंसि	स्त्रियाम्	नपुंसके	**विभक्तिः**
चत्वारः	चतस्रः	चत्वारि	**प्रथमा**
चतुरः	चतस्रः	चत्वारि	**द्वितीया**
चतुर्भिः	चतसृभिः	चतुर्भिः	**तृतीया**
चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः	**चतुर्थी**
चतुर्भ्यः	चतसृभ्यः	चतुर्भ्यः	**पञ्चमी**
चतुर्णाम्	चतसृणाम्	चतुर्णाम्	**षष्ठी**
चतुर्षु	चतसृषु	चतुर्षु	**सप्तमी**

त्रिषु लिङ्गेषु समानः पञ्चन्-शब्दः

बहुवचनम्	**विभक्तिः**
पञ्च	**प्रथमा**
पञ्च	**द्वितीया**
पञ्चभिः	**तृतीया**
पञ्चभ्यः	**चतुर्थी**
पञ्चभ्यः	**पञ्चमी**
पञ्चानाम्	**षष्ठी**
पञ्चसु	**सप्तमी**

त्रिषु लिङ्गेषु समानः षट्-शब्दः

बहुवचनम्	**विभक्तिः**
षट्	**प्रथमा**
षट्	**द्वितीया**
षड्भिः	**तृतीया**
षड्भ्यः	**चतुर्थी**

षड्भ्यः	**पञ्चमी**
षण्णाम्	**षष्ठी**
षट्सु	**सप्तमी**

त्रिषु लिङ्गेषु समानः अष्टन्-शब्दः	
बहुवचनम्	**विभक्तिः**
अष्ट, अष्टौ	**प्रथमा**
अष्ट, अष्टौ	**द्वितीया**
अष्टभिः,अष्टाभिः	**तृतीया**
अष्टभ्यः,अष्टाभ्यः	**चतुर्थी**
अष्टभ्यः,अष्टाभ्यः	**पञ्चमी**
अष्टानाम्	**षष्ठी**
अष्टसु,अष्टासु	**सप्तमी**

सप्तन्-नवन् -दशन् इत्यादयः पञ्चन् शब्दवत् ज्ञेयाः॥

****